**A** | समग्र शिक्षा केरल Samagra Shiksha Kerala **समग्रशिक्षा केरलम्** | **711**

**आत्यन्तिकमूल्यनिर्णयः-I 2025-26**

| | | |
|---|---|---|
| कक्ष्या - सप्तमी | **संस्कृतम्** | समयः - सपादहोराद्वयम् |
| Std - VII | **SANSKRIT** | Time - 2¼ Hrs |

**निर्देशाः**

उत्तरलेखनात् पूर्वं छात्राणां कृते समाश्वासरूपेण 15 निमेषाः प्रदत्ताः। उत्तरलेखनाय देवनागरीलिपिः उपयोक्तव्या। षट् प्रवर्तनानि निश्चयेन करणीयानि। तत्र प्रवर्तनद्वयस्य विकल्पः अस्ति। प्रतिविकल्पस्य एकं प्रवर्तनं नूनं समाधेयम्।

**प्रवर्तनम् - १**

**क) अधो दत्तयोः कवितांशयोः " विश्वसोदरभावना हृदि आवश्यकी " इत्याशययुक्ताः पङ्क्तीः चित्वा लिखत।**

हीनचिन्तां वर्जयन्तो
ज्ञानभानुमुपास्महे ।
अज्ञतान्ध्यं वारयन्तो
याम सन्ततमग्रतः।।

विश्वमखिलं जेतुमचिरात्
मित्रकाणि यतामहै।
विश्वसोदरभावनां हृदि
शाश्वतं कलयाम रे ।।

**ख) अधो दत्तेषु उचिता प्रस्तावना का ?**

१. महाभारतस्य कर्ता भवति वेदव्यासः ।
२. महाभारतम् इतिहासकाव्यं भवति ।

A) १. अनुचिता प्रस्तावना
B) २. अनुचिता प्रस्तावना
C) १. & २. उचिते प्रस्तावने
D) १. & २. अनुचिते प्रस्तावने

**प्रवर्तनम् -२**

**क ) चित्रानुसारं पादटिप्पणीं लिखतु।**

वृक्षरोपणेन प्रकृतिसंरक्षणम्। सहजीविस्नेहः आवश्यकः।
मैत्री सन्तोषदायिनी। वार्ताश्रवणं ज्ञानवर्धनाय।





1. ................................ 2. ................................





3. ................................ 4. ................................

**ख) अधो दत्तेषु उचितः गणः कः ?**

| | |
|---|---|
| १) उपरताः | क) वाहनम् |
| २) सारमेयः | ख) मृताः |
| ३) यानम् | ग) भटः |
| ४) सैनिकः | घ) शुनकः |

A) १(क), २(ख), ३(ग), ४(घ)

B) १ (ख) , २(ग), ३ (क), ४ (घ)

C ) १ ( ख), २(घ), ३ (क), ४(ग)

D) १ (क), २(ग) , ३(ख), ४ (घ)

**प्रवर्तनम् -३ A**

**क) अधो दत्तस्य श्लोकस्य गद्यक्रमं लिखतु।**

तमहं भ्रातरं दृष्ट्वा सूर्यरश्मिभिरर्दितम् ।
पक्षाभ्यां छादयामास स्नेहात्परमविह्वलम्।

( छादयामास, अर्दितं, अहं, भ्रातरं )

सूर्यरश्मिभिः ________________ परमविह्वलं ________ दृष्ट्वा ________________ स्नेहात् पक्षाभ्यां तं __________ ।

**ख) अधो दत्तेषु उचितः गणः कः?**

१) पञ्चतन्त्रम् - विष्णुशर्मा

२) रघुवंशः - कालिदासः

३) महाभारतम् - शूद्रकः

A) १ & २ B) १,२ & ३

C) २ & ३ D) १ & ३

**अथवा**

**प्रवर्तनम् -३ B**

**क) अधो दत्तश्लोकात् समानार्थकपदान् चित्वा लिखतु।**

आवृत्याकाशमार्गेण जवेन स्म गतौ भृशम् ।
मध्यं प्राप्ते च सूर्ये तु जटायुरवसीदति ॥

1. आदित्ये ________________
2. गगनमार्गेण ________________
3. वेगेन ________________
4. अत्यन्तम् ________________

**ख) उचितं गणं चयतु।**

१. पठति - पठतु

२. लिखति - पिबतु

३. वदति - वदतु

४. भवति - भवतु

A) १, २ & ३

B) १, २ & ४

C) १, ३ & ४

D) २, ३ & ४

**प्रवर्तनम् -४ A**

**क) अधो दत्तां वार्तां पठित्वा प्रश्नानाम् उत्तराणि लिखतु।**

## ऐ पि एल् विजेता - रोयल् चलञ्चेर्स् बङ्गलूरु



बङ्गलूरु :- अष्टादशतमः ऐ. पि. एल् विजेता भवति रोयल् चलञ्चेर्स् बङ्गलूरु सङ्घः। विजयोऽयं तेषां स्वप्नसाक्षात्कारः भवति। रजत् पडितार् सङ्घनेता भवति। अस्याम् ऐ पि एल् क्रीडायां मान् ओफ दि टूर्णमेन्ट् पुरस्कारेण साय् सुदर्शन् महोदयः आदृतः।

१. अष्टादशतमः ऐ पि एल् विजेता कः ?

२. तेषां सङ्घनेता कः ?

३. मान् ओफ् दि टूर्णमेन्ट् पुरस्कारेण कः आदृतः ?

ख) यथोचितं योजयतु ।


| | |
|---|---|
| लिखति | अधावत् |
| | अचलत् |
| चलति | अपठत् |
| | अलिखत् |

अथवा

**प्रवर्तनम् -४ B**

**क) वार्तां पठित्वा अभिमुखप्रश्नानाम् उत्तराणि लिखतु।**

## विमानदुर्घटना



अहम्मदाबाद् : अहम्मदाबाद् नगरात् लन्टन् प्रति गतम् एयर् इन्ड्या 171 विमानं दुर्घटनायां अपतत्। विमानयाने द्विचत्वारिंशदधिकद्विशतयात्रिकाः आसन्। यानं "मेघानि" इति जनवासस्थले अपतत् ।

प्रवाचकः - विमानस्य नाम किम् ?

लेखकः - ______________

प्रवाचकः - याने कति यात्रिकाः आसन् ?

लेखकः - ______________

प्रवाचकः - यानं कुत्र अपतत् ?

लेखकः - ______________

**ख) यथोचितं योजयतु।**

| | |
|---|---|
| सदास्तु | सदा + अस्तु |
| | सदा + तु |
| मास्तु | मा + तु |
| | मा + अस्तु |

**प्रवर्तनम् -५**

**क) उदाहरणानुसारं लिखतु।**

दुष्टा चिन्ता - दुष्टचिन्ता

__________ - हीनचिन्ता

**ख) सूचनानुसारं वाक्यानि रचयतु।**

उदा - लतिका पुष्पं चिनोति। लतिका फलं चिनोति।
लतिका पुष्पं फलं च चिनोति।

छात्रः गृहं परिपालयति। छात्रः उद्यानं परिपालयति।

..................................................

**ग) अधो दत्तानि वाक्यानि पठित्वा साधु गणं लिखतु।**

१. मनुष्यजीवने गुणाः अवगुणाः च सन्ति।
२. अस्माभिः गुणाः एव आर्जनीयाः
३. गुणाः मानवं संस्कुर्वन्ति।
४. अवगुणान् त्यजतु।

A) १ उचितम् २, ३ & ४ अनुचितम्
B) १ & २ उचितम् ३ & ४ अनुचितम्
C) १ & ४ उचितम् २ & ३ अनुचितम्
D) १, २, ३ & ४ उचितम्

**घ) उदाहरणानुसारं पूरयतु।**

**उदा -** राहुलः पाठं पठति ।

हे राहुल, पाठं पठतु ।

बालः कथां लिखति ।

---------------------------

**प्रवर्तनम् -६**

**क) सूचनाः स्वीकृत्य रामायणम् अधिकृत्य टिप्पणीं लिखतु।**

सूचनाः - आदिकाव्यं भवति।

वाल्मीकिः भवति।

सप्तकाण्डानि सन्ति।

स्नेहस्य विविधभावाः।

**ख) उदाहरणानुसारं वाक्यं रचयतु।**

**उदा -** एषः छात्रः आसीत्। एषः अध्यापकः अस्ति।

पुरा एषः छात्रः आसीत् इदानीम् अध्यापकः अस्ति।

एषः अङ्कुरः आसीत्। एषः वृक्षः अस्ति।

-----------------------------------------------